अमरकोशः

Amarakosha Sample

यस्य ज्ञानदयासिंधोरगाधस्यानघा गुणाः
सेव्यतामक्षयो धीराः स श्रिये चामृताय च
समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः
संपूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम्
प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित्
स्त्रीपुंनपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित्
भेदाख्यानाय न द्वन्द्वो नैकशेषो न संकरः
कृतोऽत्र भिन्नलिङ्गानामनुक्तानां क्रमादृते
त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने तु द्वयोरिति
निषिद्धलिङ्गं शेषार्थं त्वन्ताथादि न पूर्वभाक्
स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः
सुरलोको द्योदिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम्
अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः
सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः
आदितेया दिविषदो लेखा अदितिनन्दनाः
बर्हिर्मुखाः ऋतुभुजो गीर्वाणा दानवारयः
वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम्
आदित्यविश्ववसवस्तुषिताभास्वरानिलाः
महाराजिकसाध्याश्च रुद्राश्च गणदेवताः
विद्याधराप्सरोयक्षरक्षोगन्धर्वकिंनराः
पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः
असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः
शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः
सर्वज्ञः सुगतः बुद्धो धर्मराजस्तथागतः
समन्तभद्रो भगवान्मारजिल्लोकजिज्जिनः
षडभिज्ञो दशबलोऽद्वयवादी विनायकः
मुनीन्द्रः श्रीघनः शास्ता मुनिः शाक्यमुनिस्तु यः
स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः
गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः
ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः
हिरण्यगर्भो लोकेशः स्वयंभूश्चतुराननः
धाताब्जयोनिर्दुहिणो विरिञ्चिः कमलासनः
स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृग्विधिः
नाभिजन्माण्डजः पूर्वो निधनः कमलोद्भवः
सदानन्दो रजोमूर्तिः सत्यको हंसवाहनः
विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः
दामोदरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः
उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः
पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः
देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः
वनमाली बलिध्वंसी कंसारातिरधोक्षजः
विश्वम्भरः कैटभजिद्विधुः श्रीवत्सलाञ्छनः
पुराणपुरुषो यज्ञपुरुषो नरकान्तकः
जलशायी विश्वरूपो मुकुन्दो मुरमर्दनः
वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः
बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रजः
रेवतीरमणो रामः कामापलो हलायुधः
नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हली
संकर्षणः सीरपाणिः कालिन्दीभेदनो बलः
मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः
कंदर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः
शम्बरारिर्मनसिजः कुसुमेषुरनन्यजः
पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः
अरविन्दमशोकं च चूतं च नवमल्लिका
नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः
उन्मादनस्तापनश्च शोषणः स्तम्भनस्तथा
संमोहनश्च कामश्च पञ्च बाणाः प्रकीर्तिताः
ब्रह्मसूर्विश्वकेतुः स्यादनिरुद्ध उषापतिः
लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया
इन्दिरा लोकमाता मा क्षीरोदतनया रमा
भार्गवी लोकजननी क्षीरसागरकन्यका
शङ्खो लक्ष्मीपतेः पाञ्चजन्यश्चक्रं सुदर्शनः
कौमोदकी गदा खड्गो नन्दकः कौस्तुभो मणिः
छपः शार्ङ्गं मुरारेस्तु श्रीवत्सो लाञ्छनं स्मृतम्
अश्वाश्च शैव्यसुग्रीवमेघपुष्पबलाहकाः
सारथिर्दारुको मन्त्री ह्युद्धवश्चानुजो गदः
गरुत्मान्गरुडस्ताक्ष्यो वैनतेयः खगेश्वरः
नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः
शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः
ईश्वरः शर्व ईशानः शंकरश्चन्द्रशेखरः
भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः
मृत्युञ्जयः कृत्तिवासाः पिनाकी प्रमथाधिपः
उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत्
वामदेवोमहादेवो विरूपाक्षस्त्रिलोचनः
कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः
हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः
गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः
व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः
अहिर्बुध्न्योऽष्टमूर्तिश्च गजारिश्च महानटः
कपर्दोऽस्य जटाजूटः पिनाकोऽजगवं धनुः
प्रमथाः स्युः पारिषदा ब्राह्मीत्याद्यास्तु मातरः
विभूतिर्भूतिरैश्वर्यमणिमादिकमष्टधा
अणिमा महिमा चैव गरिमा लघिमा तथा

प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्ट सिद्धयः
उमा कात्यायनी गौरी काली हैमवतीश्वरी
शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला
अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका
आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा
कर्ममोटी तु चामुण्डा चर्ममुण्डा तु चर्चिका
विनायको विघ्नराजद्वैमातुरगणाधिपाः
अप्येकदन्तहेरंबलम्बोदरगजानना:
कार्तिकेयो महासेनः शरजन्मा षडाननः
पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः
बाहुलेयस्तारकजिद्विशाखः शिखिवाहनः
षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः
शृङ्गी भृङ्गी रिटिस्तुण्डी नन्दिको नन्दिकेश्वरः
इन्द्रो मरुत्वान्मघवा बिडौजाः पाकशासनः
वृद्धश्रवाः सुनासीरः पुरुहूतः पुरन्दरः
जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः
सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा
बास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः
जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः
संक्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः
आखण्डलः सहस्राक्ष ऋभुक्षास्तस्य तु प्रिया
पुलोमजा शचीन्द्राणी नगरी त्वमरावती
हय उच्चैःश्रवा सूतो मातलिर्नन्दनं वनम्
स्यात्प्रासादो वैजयन्तो जयन्तः पाकशासनिः